श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुर्नवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्नवतितमः सर्गः ॥

## कुशलवकर्तृकं रामायणकाव्यगानं श्रीरामेण तस्य सभायां श्रवणम्

तौ रजन्यां प्रभातायां स्नातौ हुतहुताशनौ।
यथोक्तमृषिणा पूर्वं सर्वं तत्रोपगायताम्॥ **7.94.1** ॥

तां स शुश्राव काकुत्स्थः पूर्वाचार्यविनिर्मिताम्।
अपूर्वां पाठ्यजातिं च गेयेन समलङ्कृताम्॥ **7.94.2** ॥

प्रमाणैर्बहुभिर्बद्धां तन्त्रीलयसमन्विताम्।
बालाभ्यां राघवः श्रुत्वा कौतूहलपरोऽभवत्॥ **7.94.3** ॥

अथ कर्मान्तरे राजा समाहूय महामुनीन्।
पार्थिवांश्च नरव्याघ्रः पण्डितान् नैगमांस्तथा॥ **7.94.4** ॥

पौराणिकाञ्शब्दविदो ये वृद्धाश्च द्विजातयः।
स्वराणां लक्षणज्ञांश्च उत्सुकान् द्विजसत्तमान्॥ **7.94.5** ॥

लक्षणज्ञांश्च गान्धर्वान् नैगमांश्च विशेषतः।
पादाक्षरसमासज्ञांश्छन्दःसु परिनिष्ठितान्॥ **7.94.6** ॥

कलामात्राविशेषज्ञाञ्ज्यौतिषे च परं गतान्।
क्रियाकल्पविदश्चैव तथा कार्यविशारदान्॥ **7.94.7** ॥

भाषाज्ञानिङ्गितज्ञांश्च नैगमांश्चाप्यशेषतः।
हेतूपचारकुशलान् हैतुकांश्च बहुश्रुतान्॥ **7.94.8** ॥

छन्दोविदः पुराणज्ञान् वैदिकान् द्विजसत्तमान्।
चित्रज्ञान् वृत्तसूत्रज्ञान् गीतनृत्यविशारदान्॥ **7.94.9** ॥

शास्त्रज्ञान् नीतिनिपुणान् वेदान्तार्थप्रबोधकान्।
एतान् सर्वान् समानीय गातारौ समवेशयत्॥ **7.94.10** ॥

तेषां संवदतां तत्र श्रोतृणां हर्षवर्धनम्।
गेयं प्रचक्रतुस्तत्र तावुभौ मुनिदारकौ॥ **7.94.11** ॥

ततः प्रवृत्तं मधुरं गान्धर्वमतिमानुषम्।
न च तृप्तिं ययुः सर्वे श्रोतारो गेयसम्पदा॥ **7.94.12** ॥

हृष्टा मुनिगणाः सर्वे पार्थिवाश्च महौजसः।
पिबन्त इव चक्षुर्भिः पश्यन्ति स्म मुहुर्मुहुः॥ **7.94.13** ॥

ऊचुः परस्परं चेदं सर्व एव समाहिताः।
उभौ रामस्य सदृशौ बिम्बाद् बिम्बमिवोत्थितौ॥ **7.94.14** ॥

जटिलौ यदि न स्यातां न वल्कलधरौ यदि।
विशेषं नाधिगच्छामो गायतो राघवस्य च॥ **7.94.15** ॥

एवं प्रभाषमाणेषु पौरजानपदेषु च।
प्रवृत्तमादितः पूर्वसर्गं नारददर्शितम्॥ **7.94.16** ॥

ततः प्रभृति सर्गांश्च यावद् विंशत्यगायताम्।
ततोऽपराह्णसमये राघवः समभाषत॥ **7.94.17** ॥

श्रुत्वा विंशतिसर्गांस्तान् भ्रातरं भ्रातृवत्सलः।
अष्टादश सहस्राणि सुवर्णस्य महात्मनोः॥ **7.94.18** ॥

प्रयच्छ शीघ्रं काकुत्स्थ यदन्यदभिकाङ्क्षितम्।
ददौ स शीघ्रं काकुत्स्थो बालयोर्वै पृथक् पृथक्॥ **7.94.19** ॥

दीयमानं सुवर्णं तु नागृह्णीतां कुशीलवौ।
ऊचतुश्च महात्मानौ किमनेनेति विस्मितौ॥ **7.94.20** ॥

वन्येन फलमूलेन निरतौ वनवासिनौ।
सुवर्णेन हिरण्येन किं करिष्यावहे वने॥ **7.94.21** ॥

तथा तयोः प्रब्रुवतोः कौतूहलसमन्विताः।
श्रोतारश्चैव रामश्च सर्व एव सुविस्मिताः॥ **7.94.22** ॥

तस्य चैवागमं रामः काव्यस्य श्रोतुमुत्सुकः।
पप्रच्छ तौ महातेजास्तावुभौ मुनिदारकौ॥ **7.94.23** ॥

किम्प्रमाणमिदं काव्यं का प्रतिष्ठा महात्मनः।
कर्ता काव्यस्य महतः क्व चासौ मुनिपुङ्गवः॥ **7.94.24** ॥

पृच्छन्तं राघवं वाक्यमूचतुर्मुनिदारकौ।
वाल्मीकिर्भगवान् कर्ता सम्प्राप्तो यज्ञसंविधम्।
येनेदं चरितं तुभ्यमशेषं सम्प्रदर्शितम्॥ **7.94.25** ॥

सन्निबद्धं हि श्लोकानां चतुर्विंशत्सहस्रकम्।
उपाख्यानशतं चैव भार्गवेण तपस्विना॥ **7.94.26** ॥

आदिप्रभृति वै राजन् पञ्चसर्गशतानि च।
काण्डानि षट्कृतानीह सोत्तराणि महात्मना॥ **7.94.27** ॥

कृतानि गुरुणास्माकमृषिणा चरितं तव।
प्रतिष्ठा जीवितं यावत् तावत् सर्वस्य वर्तते॥ **7.94.28** ॥

यदि बुद्धिः कृता राजञ्छ्रवणाय महारथ।
कर्मान्तरे क्षणीभूतस्तच्छृणुष्व सहानुजः॥ **7.94.29** ॥

बाढमित्यब्रवीद् रामस्तौ चानुज्ञाप्य राघवम्।
प्रहृष्टौ जग्मतुः स्थानं यत्रास्ते मुनिपुङ्गवः॥ **7.94.30** ॥

रामोऽपि मुनिभिः सार्धं पार्थिवैश्च महात्मभिः।
श्रुत्वा तद् गीतिमाधुर्यं कर्मशालामुपागमत्॥ **7.94.31** ॥

शुश्राव तत्ताललयोपपन्नं
    सर्गान्वितं सुस्वरशब्दयुक्तम्।
तन्त्रीलयव्यञ्जनयोगयुक्तं
    कुशीलवाभ्यां परिगीयमानम्॥ **7.94.32** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुर्नवतितमः सर्गः॥